# कर्मकाण्डसंस्कारविज्ञानम्






प्रधानसम्पादकः
**प्रो. अर्कनाथचौधरी**

सम्पादकः
**डॉ. शत्रुघ्नपाणिग्राही**

सहसम्पादकः
**डॉ. अश्विन का. राजगोरः**

# कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)


**आयोजकसंस्थाः**

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
सन्तश्री सन्ध्यागिरिबापुसंस्कृतविद्यालयः

**संरक्षकाः**

पू. सन्तश्रीभगवद्गिरी बापु
प्रो. अर्कनाथचौधरी
प्रो. विरूपाक्षजडिपालः

**प्रकाशकः**

डॉ. महेन्द्रकुमार अं. दवे
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

ISBN : 978-93-83097-23-4

प्रतिलिपयः – ५००
प्रकाशनवर्ष–२०१७
प्राप्तिस्थानम् – सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः,
सामख्याली, कच्छ, गुजरातम् तथा
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

**मुद्रणम्:**

**जलाराम ग्राफीकस अेन्ड ओफसेट**
**परमहंस अेपार्टमेन्ट के पास, होटल कावेरी के पीछे,**
**अेस टी रोड, वेरावल - ३६२ २६६.**
**फोन : (०२८७६) २२१८६१**

# सामाजिकजीवने उपनयनसंस्कारस्यावश्यकता

डॉ. महेन्द्रकुमार अं. दवे

मानवजीवने संस्कारा: अत्यधिकं आवश्यकं वर्तन्ते । संस्कारस्य विविधा: अर्था: भवन्ति यथा मीमांसका: कथयन्ति यत् प्रोक्षणादिजन्य संस्कारो यज्ञाङ्गपुरोडाशादिकस्य विधिपूर्वकं शुद्धिनाम संस्कार: ।[1] अद्वैतवेदान्तिन: कथयन्ति यत्- स्नानाचमनादिजन्या: संस्कारा: देहे उत्पद्यमानानि तदभिधानानि जीवे कल्प्यन्ते ।[2] संस्कारशब्दै: धार्मिकक्रियया सह दैहिक-मानसिकबौद्धिक परिष्करणस्यापि आवश्यकता प्रतिभाति । मनुस्मृत्यां कथयति यत्-

**वैदिके कर्मभि: पुण्यै: निषेकादिर्द्विजन्मनाम् ।**

**कार्य: शरीरसंस्कार: पावन: प्रेत्य चेह च ।।[3]**

एवं योगसूत्रे व्यासभाष्ये शरीरशुद्धिविषयकं संस्करणस्य विषये प्रकाशयति । यथा- "कायमाधेयशौचत्वात् पण्डिता ह्यशुचिं विदु: ।[4]"4 ते मानवस्य शारीरिरकीं मानसिकीं चोभयविधां स्थितिं द्योतयन्ति । संस्कृतो मानवो योग्याम् उचिताञ्च प्रतिष्ठामश्नुते । नैके प्रारम्भिका विचारा: धार्मिका: क्रियाकलापा:, तदनुगामिनो बहवो नियमा: आचार्यपद्धतिश्चेति सर्वमिदं संस्कारेषु समाविष्टं वर्तते । इमे संस्कारा: अनौपचारिकं शरीरसंस्कारमेव नोदिशन्ति अपि तु संस्कार्यजनस्य समग्रं व्यक्तित्वं परिष्कृत्य तं शोधयन्ति पूर्णताञ्च प्रापयन्ति । संस्कारै: अन्त:करणं शुद्ध्यति । ते मानवं पापाद् अज्ञानाच्च निवार्य आचारविचाराभ्यां ज्ञानविज्ञानाभ्यां च संयोजयन्ति । संस्कारै: वस्तुन उत प्राणिनोऽधिकं संस्करणम् , परिमार्जनम्, उपादेयकरणमेव प्राधान्येन उद्दिश्यते । अर्थात् संस्कारा: पात्रतां समुद्भावयन्ति । सभ्यताया:, संस्कृत्या:, प्रज्ञायाश्च विकासेन सहैव अस्माकं मनीषिणो मानवजीवनं अधिकाधिकं क्षमतासंपन्नं संवेदनशीलं, भावप्रवणम्, उपयोगि च विधातुमेव संस्काराणाम् अनिवार्यतां स्वीचक्रु: ।

अन्येषां प्राणिनामपेक्षया मानव: सर्वश्रेष्ठ: प्राणी वर्तते । मानवशिशौ जन्मन: प्राग् गर्भे एव संस्काराणां बीजारोपणमारभते । जन्मोत्तरं विविधै: संस्कारै: मनोबुद्ध्यो: विकसितत्वात् संस्काराणाम् आवश्यकता वर्तते । जडपदार्थानां पुनरोद्धारोऽपि संस्कार उच्यते । संस्कारा: मानवस्य शारीरिक दोषान् अपाक्रियन्ते । शरीरे केचन मला: भवन्ति तथैव क्षात्रोचितकर्म परित्यज्य क्षत्रियै: भिक्षाचरणं तेषां कृते मलो वर्तते । तथैव विप्रै: वेदशास्त्रविरुद्धं आचरणं तेषां कृते मलो वर्तते ।

यथा महाभारते उक्तम् "क्षत्रियस्य मलं भैक्ष्यं ब्राह्मणस्याश्रुतं मलम् ।[5]" एतेषु केचन सत्कर्मानुष्ठानात्मका संस्कारा: अज्ञानादिदोषान् अपनयन्ति । अपराणि च विशिष्टसंस्कार कर्माणि शुचितासद्विद्यात् अतिशयाधानं कुर्वन्ति । संस्कारै: न केवलं शारीरिकी शुद्धिरेव किन्तु आत्मशुद्धिरपि संभवति अत: एव "ब्राह्मीयं क्रियते तनु: । इति महर्षे: मनो: उक्तिरपि सङ्गच्छते । तर्हि भगवता मनुना जन्मना जायते शूद्र: संस्काराद् द्विज उच्यते ।।" इति कथयित्वा जन्मकाले प्रत्येकं मानव: शूद्रो भवन्ति ते संस्कारै: एव शुद्धो भवति । संस्कारां तु अनेका: सन्ति किन्तु षोडशैव संस्कारा: सर्वत्र प्रसिद्धा दृश्यन्ते । तेषु संस्कारेषु उपनयनसंस्कार: अति महत्त्वपूर्णोऽभिमन्यते । संस्कारोऽयं मुख्य: शैशिकसंस्कारो वर्तते । अनेन संस्कारेण जातकस्य सामाजिके जीवने पदार्पणं भवति । समाजे सामुदायिककर्तव्य:, संस्कृते: - सभ्यतायाश्च संरक्षणम् इत्थं बहुविधानि दायित्वानि अपेक्षते । व्यक्तौ सामाजिकताया: अभ्युदयाय शिक्षाया महत्त्वपूर्णं स्थानम् अवदानं च वर्तते । सांस्कृतिकतायां च मिथो घनिष्ठो सम्बन्धो वर्तते । पुरा हि मानव: सांस्कृतिकदृष्ट्या सक्षम आसीत् स एव सामाजिक इत्यभिमन्यते स्म । उभयविकासमापन्न एव समाजे समग्रान् अधिकारान् विशिष्टा: सुविधाश्च आदातुम् अधिकृत आसीत् । उपनयन संस्कारस्य माध्यमेन सांस्कृतिकदृष्ट्या सामाजिकदृष्ट्या च दीक्षितस्य मनुजस्य नूतनं जन्म जायते । अत उपनीतो द्विज इत्यभिधीयते ।[6] उपनयन संस्कारेणैव युवक: आर्यकन्यां विवोढुम् अर्हो भवति । ऋग्वेदे विद्याध्ययनम् अनुदिश्य ब्रह्मचर्य शब्दो द्वि: प्रत्युक्तो वर्तते - ब्रह्मचारी चरति वेविषद्विष: स देवानां भवत्येकमङ्गम् ।।[7] तथा च कथयति -

**युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः ।**

**तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ।।[८]**

अथर्ववेदेऽपि उपनयनं तस्य द्वितीयं जन्म मन्यते ।[९] तथा च जायमानो ह वै ब्राह्मणस्त्रिभिऋणर्वा जायते ब्रह्मचर्येणऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी ।[१०] इत्थं तैत्तिरीयसंहितायाम् ऋणत्रयस्य वर्णनक्रमे ब्रह्मचारी पुनश्च ब्रह्मचर्यम् इत्युभयोः पदयोः उल्लेखः प्राप्नोति । अथर्ववेदे सूक्तमेकं ब्रह्मचारिणो ब्रह्मचर्यस्य च प्रशंसापरं वर्तते । तत्र जीवने ब्रह्मचर्यस्य महत्ता प्रतिपादयति ।[११]

ब्राह्मणकाले उपनयनं सविधिसंस्कारत्वेन प्रतिष्ठामवाप । ब्रह्मचारी स्वत आचार्यमुपगम्य छात्रत्वार्थे इच्छां करोति । उपनिषद् काले ब्रह्मचर्यम् उत छात्रजीवनं सुप्रतिष्ठितम् सांस्थानिकम् स्वरूपं प्रोप्नोत् । आचार्यविना ब्रह्मविद्यायाः प्राप्तिर्न संभवति । गोपथब्राह्मणानुसारं सर्वेषु वेदेषु सम्पूर्णमधिकारं ४८ वर्षावधिकं छात्रजीवनम् अपेक्ष्यते । तदा ब्रह्मचारी आचार्यस्य कुले एव न्यवसत् सुविश्रुतः उद्दालकः आरुणिः पुत्रं श्वेतकेतुं ब्रह्मचारित्वेन वेदाध्ययनार्थं गुरुमुपगन्तुं तमभिप्रेरयन् ।[१२] तत्र स्वाध्याय अतिरिच्य गुरुसेवा, गोचारणम्, यज्ञीयकार्याणि आदीनां कर्मणां सम्पादनं तस्य दायित्वमासीत् । प्रतिवेदं द्वादशवर्षाणाम् अध्ययनावधिः स्थिरीभवति । गृह्यसूत्रेषु कथयति यत् उपनयनं विना न कोऽपि द्विजत्वं आवहन्ति । उपनयनस्य अनेकाः अर्थाः भवन्ति यथा– उपनयन नाम ब्रह्मचारिग्रहणम्[१३] अध्ययनार्थम् आचार्यस्य उपसमीपं नीयते येन कर्मणा तदुपनयनमिति ।[१४] तथा अध्यनार्थम् आचार्यस्य उप समीपं नयनं उपनयनम् इति[१५] संस्कार रत्नमालायाम् कथयति यत् उपनयनं नाम यस्मिन् कर्मणि येन कर्मणा वा आचार्येण विद्यार्थं सुमुहूर्ते कुमारस्य स्वसमीपे नयनमिति ।[१६] आपस्तम्बोऽपि आह "उपनयनं विद्यार्थस्य श्रुतितः संस्कारः ।"[१७] याज्ञवल्क्य आह यत् गुरुः शिष्यमुपनीय तं वेदं शौचाचारांश्च अध्यापयेत् –

**उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।**

**वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ।।[१८]**

वैदिककाले शिक्षा खलु उपनयनस्य मूलप्रयोजनमासीत् । आचार्यस्य समीपे वटोः नयने अन्तर्भूतं कर्मकाण्डं गौणमासीत् । उपनयनम् आप्रथमं गुरोः समीपे नयनार्थमेव न सम्पाद्यते स्म, प्रत्युत वेदस्य प्रातिशाख्यम् अध्ययनाय वारंवारं एतदनुष्ठीयते स्म–

**यच्छाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत् ।**

**तच्छाखाध्ययनं कार्यमेवं न पतितो भवेत् ।।[१९]**

याज्ञवल्क्यो वेदाध्ययनम् उपनयनस्य प्रमुखतमङ्गं मन्यते ।[२०] आपस्तम्ब भरद्वाजादयः सूत्रकारा अपि विद्यार्जनमेव उपनयने उपदिशन् ।[२१] मनुस्मृतौ कथयति यत् उपनयनेन शौचाचाराणाम् अग्निकार्यस्य सन्ध्योपासनस्य च शिक्षामेव उद्दिशति । यथा–

**उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।**

**आचारमग्निकार्यं च सन्ध्योपासनमेव च ।।[२२]**

उपनयनस्य अधिकारः शूद्रजातेः नास्ति इति महाभारते कथयति यत्–

**स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रूति गोचरा ।**

**इति भारतमाख्यानं कृपया मुनिना कृतम् ।।[२३]** एवं याज्ञवल्क्यस्मृतौ कथयति यत् – उपनयनकर्मणैव ब्राह्मणाः क्षत्रियाः वैश्याश्च द्विज इति शब्दव्यपदेश्या जायन्ते । द्विजत्वं परिभाषमाणो याज्ञवल्क्यो न्यरूपयत् यत् मातुर्गर्भात् प्रथमं जन्म भवति, मेखलादीनां धारणात् परं ब्राह्मणक्षत्रियवैश्यानां द्वितीयं जन्म भवति ।[२४]

उपनयनस्य कालः विषये कथयति यत्- अष्टवर्षं ब्राह्मणमुपनयीत एकादशवर्षं राजन्यं द्वादशवर्षं वैश्यमिति ।[२५] याज्ञवल्क्यानुसारं गर्भतो जन्मतो वा अष्टमे वर्षे ब्राह्मणस्य, एकादशे वर्षे क्षत्रियस्य, द्वादशे वर्षे च वैश्यस्य उपनयनमनुष्ठेयम् यथा-

**गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनयनम् ।**

**राज्ञामेकादशे चैके विशामेके यथाकुलम् ।।**[२६]

गोभिलो कथयति यत् आषोडशाद्वर्षात् ब्राह्मणस्यानतीतः कालो भवति आद्वाविंशात् क्षत्रियस्य आचतुर्विंशाद् वैश्यस्य ।[२७]

उपनयनसंस्कारः उत्तरायणेऽनुष्ठेयः ।[२८] वैश्यानाम् उपनयनं दक्षिणायनेऽपि कर्तुं शक्यते ।[२९] उपनयनसंस्कारस्य शुभकालः, तिथयः, वासराः, नक्षत्राणि, योगाः, मासाः विषयेऽपि शास्त्रे निहितमस्ति । तथा च मेखलाधारणात् परं ब्रह्मचारी यज्ञोपवीतं धारयति । उपवीतस्य विषये कथयति यत् यज्ञोपवीतं कुर्वीत सूत्रेण नवतन्तुकम् ।[३०] आचार्यः अग्रेरुत्तरस्यां पूर्वाभिमुख उपविशति । इत्थं ब्रह्मचारी आचार्य पवित्रं सावित्रीमन्त्रं श्रावयितुं निवेदयति । आचार्यः प्रथमं सावित्र्या एकपादमुपदिशति, तदनु पादद्वयमुपदिशति । सावित्र्या आदावन्ते च ओङ्कारम् अवश्यम् उच्चारयेत्-

**ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।**

**स्रवत्यनोङ्कतं पूर्वं परस्ताच्च विशीर्यति ।।**[३१]

तदनन्तरं कुलाचारानुसारं विधिविधानपूर्वकं यज्ञोपवीतं धारणीयः । भिक्षाचरणं ब्रह्मचारिणि एकं प्रमुखं कर्तव्यम् ।[३२] मेखलाधारणात् परं ब्रह्मचारी यज्ञोपवीतं धारयति । यज्ञोपवीतं उपनयनसंस्कारस्य सर्वप्रधानं अङ्गं वर्तते । यज्ञोपवीतस्य महिमा तैत्तिरीयाररण्यके उपवर्णिता- "यज्ञोपवीती सन् यो यज्ञं कुरुते यज्ञस्तस्य विस्सृत्वरो भवति, किन्तु यो न धारयति यज्ञोपवीतं तस्य राज्ञो नैवं भवति, परिधाय यज्ञोपवीतं ब्राह्मणो यत्किञ्चिन कुरुते यज्ञो वै स भवति । अतोऽध्ययनकाले यज्ञकाले आचार्यकरणकाले च यज्ञोपवीतं धारयेत् । मृगचर्मेण वस्त्रेण वा प्राचीनावीतिना संवीतिना च भाव्यमिति ।[३३] उपनयनावसरे बालकाय नववस्त्रप्रदानात्पूर्वम् आचार्येण येन मन्त्रेण तद् वस्त्रमभिमन्त्र्यते तत्रोच्यते यत् देव्योऽस्य वस्त्रस्य वयनरूपेण बुद्धिरिवावयन् ।[३४] भावनाचेयं वर्तते यदेतत् परिधास्यमानं वस्त्रं शिक्षयाः प्रतीकभूतं बुद्धेर्विकासे सहायकं भविष्यति । पारस्करगृह्यसूत्रे (२-२-७) वस्त्रपरिधानावसरे यो मन्त्र उच्चार्यते तत्राप्येतदुच्यते यदेतत् वस्त्रम्, अर्थात् तेन सह प्राप्स्यमाना शिक्षा, बालकस्य दीर्घायुष्ट्वं बलं तेजस्वितां चावक्ष्यति ।[३५] यज्ञोपवीत धारणावसरेऽपि यो मन्त्र उच्चार्यते तत्र लक्ष्यं वर्ण्यते दीर्घायुः प्राप्तिः, शोभनवीरता बलं वा तादृशं बुद्धिवैभवं येन सर्वेषु वेदेषु अधिकारः स्यात् येन च यशो वर्धेत ब्रह्मतेजश्च लभ्येत ।[३६] मेखलाबन्धनावसरेऽपि कौशिकसूत्रे (५६.१) उच्चार्यते तत्र मेखला तपसः श्रद्धायाः प्रतीकभूता मन्यते सा च प्रार्थ्यते यत् सा ब्रह्मचारिणि बुद्धिं मेघां च स्थापयेत् अथ च तपोभावनां सन्निवेशयेत् ऐन्द्रियं बलं च प्रदधात् ।[३७] तथैव च ब्रह्मचारिवेषावयवोऽजिनमपि ब्रह्मचारिणे एकस्मिन् पक्षे धारणशक्तिं ददाति, अन्यस्मिन् च पक्षे तं ज्ञानेन तेजस्विनं यशस्विनं च करोति ।[३८]

उपनयनसंस्कारांगभूतं समिधादानं प्रज्वलितसमिध इव ब्रह्मचारिणि ज्ञानदीप्तेराधानस्य प्रतीकम् । हिरण्यकेशिगृह्यसूत्रे ब्रह्मचारिणा अधीयमानासु तिसृषु समित्सु ये त्रयो मन्त्राः उच्चार्यन्ते । तेषु दिव्यमेघावाप्तिप्रार्थना क्रियते ।[३९] वस्तुतः मनुष्यजन्मनि मेधैव पशुभिः भिन्नो विशिष्टो गुणो वर्तते । तदवाप्तिश्च शिक्षायाः प्रमुखमुद्देशम् । मेधया शारीरिकबलेन चान्यामपि सर्वविधां समृद्धिं मनुष्यः शक्नोत्यासुम् । अत एवाधिकांशगृह्यसूत्रेषु समिधादानकर्मणि विनियुक्ते मन्त्रे दीर्घायुः, तेजः, दानशक्तिः, मेधा, सन्ततिः, पशुसमृद्धिः, ब्रह्मवर्चसम्, अन्नभक्षणम्, पूर्णस्वास्थ्यं प्रार्थ्यते ।[४०] इत्थं जवीनोपकारकं शिक्षयाः विशेषसंस्काराः अपि उपनयनसंस्कारेण लभ्यन्ते ।

सन्दर्भसूची :-


१. वाचस्पत्यम्–बृहदभिधानम्–५–पृ. ५१८८

२. वाचस्पत्यम्–बृहदभिधानम्–५–पृ. ५१८८

३. मनुस्मृतिः – २.२६

४. योगसूत्र व्यासभाष्यः –२.५

५. महाभारतम् – क. प. ·– ४५.२३

६. मातुयदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।

ब्राह्मणक्षत्रियविशास्तस्मादेते द्विजाः स्मृताः ।। – याज्ञवल्क्यस्मृतिः १.३९

७. ऋग्वेदः १०.१०९.५

८. ऋग्वेदः ३.८.४

९. आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।

तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ।। – अथर्ववेदः–११.५.३

१०. तैत्तिरीय संहिता–६.३.१०.५

११. ब्रह्मचारीष्णंश्चरति रोदसी उभे तस्मिन्देवाः संमनसो भवन्ति ।

स दातार पृथिवीं दिवञ्च स आचार्यं तपसा पिपर्ति ।। – अथर्ववेदः – ११.३.१

१२. श्वेतकेतुर्हारुणेय आस तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं... स ह द्वादशवर्ष उपेत्य.. ।। धर्मशास्त्रका इतिहास भाग–१ पृ. २११

१३. अथर्ववेदः ११.५.३

१४. गोभिलगृह्यसूत्रम्– २.१०.१

१५. पारस्करगृह्यसूत्रगदाधरभाष्यम् – २.२

१६. संस्काररत्नमाला–पृ. १६४

१७. आपस्तम्भधर्मसूत्रम् – १.१.९

१८. याज्ञवल्क्यस्मृतिः – १.१५

१९. वसिष्ठः संस्कारप्रकाशः – पृ. ४१५

२०. याज्ञवल्क्यस्मृतिः – १.१५

२१. आपस्तम्ब धर्मसूत्रम् – १.१.९

२२. मनुस्मृतिः – २.६९

२३. महाभारतम्

२४. मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।

ब्राह्मणक्षत्रियविशास्तस्मादेते द्विजाः स्मृताः ।। – याज्ञवल्क्यस्मृतिः – १.३९

२५. संस्कारप्रकाशः – पृ. ३४०

२६. याज्ञवल्क्यस्मृतिः – १.१४

२७. गोभिलगृह्यसूत्रम् २.१०.३

२८. नृसिंहः, पारस्करगृह्यसूत्र गधादरभाष्यम् – २.२ तथा आश्वलायनगृह्यसूत्रम् – १.४.१

२९. बृहस्पतिः, संस्काररत्नमाला–पृ. १७०

३०. स्मृतिचन्द्रिका–भाग–११ पृ. ३१

३१. मनुस्मृतिः २.७४

३२. अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।

अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ।। –मनुस्मृतिः २.१८७

३३. तैत्तिरिय आरण्यकः – २.१

३४. रेवती... धीयोऽवयन् । – आपस्तम्बगृह्यसूत्रम् ४.१०.१०. : मन्त्रपाठः – २.२.३

३५. येनेन्द्राय बृहस्पतिर्वासः पर्यदंधादमृतं तेन ।

त्वा परिदधाम्वायुषै दीर्घायुत्वाय बलाय वर्चसे ।। पारस्करगृह्यसूत्रम् – २.२.७

३६. यज्ञस्योपवीतेनोपव्ययामि दीर्घायुत्वाय सुप्रजास्त्वाय सुवीर्यय ।

सर्वेषां वेदानामधिपत्याय यशसे ब्रह्मवर्चसाय त्वा । – कौषितकि गृह्यसूत्रे – २.१.३१

३७. सा नो मेखले मतिमाधेहि मेधामथो नो धेहि तप इन्द्रियं च । – अथर्ववेदः – ६.१३३.४

३८. पारस्करगृह्यसूत्रम् २.२.१०

३९. मेधां च इन्द्रो दधातु मेधां देवी सरस्वती ।

मेधां मे अश्विनावुभवाधत्तां पुष्करस्रजौ ।। हिरण्यकेशिगृह्यसूत्रम् – १.८.४

४०. सामायुषा वर्चसा सन्या मेधया प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय । आपस्तम्बमन्त्रपाठः – २.६.२

कुलसचिव (का.)

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्